DITTO WS

Reg. No. : ....................................

Name : ..........................................

**S-2218**

**SECOND YEAR HIGHER SECONDARY**
**SAY / IMPROVEMENT EXAMINATION, JUNE – 2023**

Part – III

**SANSKRIT SAHITYA**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

***निर्देशा :***

- 15 निमेषाः समाश्वाससमयः ।
- प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः ।
- उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

***നിർദ്ദേശങ്ങൾ:***

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു.
- ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**1-8 प्रश्ननानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत ।** **8 × 1 = 8**

**1-8 വരെ ചോദ്യങ്ങൾക്ക് ബ്രാക്കറ്റിൽ നിന്നും ശരിയായ ഉത്തരം തിരഞ്ഞെടുത്ത് എഴുതുക. 1 സ്കോർ വീതം.**

1. कृष्णस्य सतीर्थ्यतां गतः द्विजः कः ?

   (कुचेलः, सान्दीपनिः, बलरामः)

2. सन्तानगोपालप्रबन्धस्य कर्ता कः ?

   (कार्तिक तिरुनाल्, अश्वति तिरुनाल्, अनिषं तिरुनाल्)

3. शिशुपालवधाख्यस्य काव्यस्य नामान्तरं किम् ?

   (माघम्, मेघम्, किरातम्)

4. अलङ्कारपद्धतेः आचार्यः कः ?

   (भामहः, भरतः, आनन्दवर्धनः)

5. चारुदत्तस्य सर्वकालमित्रं कः ?

   (मैत्रेयः, चारुदत्तः, शूद्रकः)

6. नवभारतकाव्यस्य कर्ता कः ?

   (रवीन्द्रनाथ ठाकुरः, मुतुकुलं श्रीधरः, बाणभट्टः)

7. गीताञ्जलिर्नामकः ग्रन्थः केन विरचितः ?

   (रवीन्द्रनाथ ठाकुरेण, मुतुकुलं श्रीधरेण, बाणभट्टेन)

8. वरतन्तुशिष्यः कः

   (कौत्सः, कुबेरः, रघुः)

**9-12 अधः प्रदत्तेभ्यो त्रयाणाम् उत्तराणि लिखत । प्रत्येकम् अङ्कद्वयम् ।** **(3 × 2 = 6)**

**9-12 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക. 2 സ്കോർ വീതം.**

9. एकपदं लिखत ।

(क) समानं शीलं यस्याः सा ।

(ख) रमायाः पतिः ।

10. पदच्छेदं लिखत ।

(ग) नष्टास्तनूजाः ।

(घ) आलोकयेति ।

11. सन्धत्त ।

(ङ) दुःखानि + अपि ।

(च) न + एव ।

12. विग्रहवाक्यं लिखत ।

(छ) मृन्मये ।

(ज) समाप्तविद्येन ।

**13-15 अधः प्रदत्तेषु त्रयाणां प्रश्नानामुत्तराणि लिखत ।** **(3 × 3 = 9)**

**13-15 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക. 3 സ്കോർ വീതം.**

13. प्रदत्ते वाक्ये क्त्वान्त – ल्यबन्त तुमुन्नन्तपदानि चित्वा लिखत ।

“श्वेतकेतुः गुरुकुले वर्षाणि उषित्वा सकलाः विद्याः स्वीकृत्य स्वभवनं प्रतिगन्तुम् इच्छति स्म”

14. कोष्ठकात् समुचितपदानि चित्वा प्रदत्तं सम्भाषणांशं पूरयत ।

चारुदत्तः – [चिन्तामग्नः]

विदूषकः – _______ ! किमिदं चिन्त्यते ?

चारुदत्तः – _______ ! दुःखानि अनुभूय यत्सुखम् आयाति, तदेव शोभते ।

विदूषकः – भो वयस्य ! _______ दारिद्र्यात् कतरत् ते रोचते ।

[भोः, मरणात्, वयस्य]

15. प्रदत्तम् आशयं पठित्वा तदाशयप्रतिपादकं पद्यं चित्वा लिखत ।

| |
|---|
| अनन्तरं लज्जासहिताद् कुचेलात् पृथुकं प्रगृह्य कृष्णेन भक्षिते सति एतावता पर्याप्तम् इति रुक्मिणी कृष्णहस्तं रुद्धवती । |

कुचेल नामा भवतः सतीर्थ्यतां
गतः सः सान्दीपनिमन्दिरे द्विजः ।
त्वदेकरागेण धनादिनिः स्पृहो
दिनानि निन्ये प्रशमी गृहाश्रमी ।।

त्रपाजुषोऽस्मात् पृथुकं बलादथ
प्रगृह्य मुष्टौ सकृदाशिते त्वया ।
कृतं कृतं नन्वियतेति सम्भ्रमात्
रमा किलोपेत्य करं रुरोध ते ।।

स रत्नशालासु वसन्नपि स्वयम्
समुन्नमद्भक्तिमरोऽमृतं ययौ ।
त्वमेवमापूरितभक्तवाञ्छितो
मरुत्पुराधीश हरस्व मे गदान् ।।

**16 - 20 चतुर्णां प्रश्नानामुत्तराणि लिखत । प्रत्येकं अङ्क चतुष्कम् ।** **(4 × 4 = 16)**

**16 – 20 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും നാലെണ്ണത്തിന് ഉത്തരമെഴുതുക. 4 സ്കോർ വീതം.**

16. उदाहरणानुसारं पदच्छेदं लिखत ।

उदा. गणयन्नपि – गणयन् + अपि ।

वसन्नपि – _______ + अपि ।

उदा. जनैरित्थम् – जनैः + इत्थम् ।

गणैरिति – _______ + इति ।

उदा. बुद्धिरेव – बुद्धिः + एव ।

कीर्तिरेव – _______ + एव ।

उदा. सोऽपि – सः + अपि

रामोऽपि – रामः + _______

17. अधः प्रदत्तस्य पद्यस्य गद्यक्रमं पूरयत ।

वाहने स्थलजले दिवि दिक्षु

स्थापनेऽपि च वयं हि निपिष्टाः ।

वर्णगर्वितसितैरपि धार्ष्ट्यम्

खण्ड्यतेऽस्मदभिजातमहत्वम् ।।

**गद्यक्रमः** –

वयं हि _______ स्थलजले दिवि दिक्षु _______ अपि वर्णगर्वितसितैः _______ अस्मदभिजातमहत्वं धार्ष्ट्यं _______ ।

18. प्रदत्ते वाक्ये रेखाङ्कितपदानां स्थाने समानार्थकानि पदानि कोष्ठकात् चित्वा वाक्यं पूरयत ।

विश्वजिति अध्वरे निश्शेषविश्राणितकोशजातं क्षितीशम् उपात्तविद्यः वरतन्तुशिष्यः गुरुदक्षिणार्थी कौत्सः तं प्रपेदे ।

[राजानम्, प्राप्तवान्, आर्जितविद्यः, यागे]

19. प्रदत्तस्य गद्यभागं मलयालभाषया आङ्गलभाषया वा अनुवदत ।

महाकवेः बाणभट्टस्य अनुपमं काव्यं भवति कादम्बरी । काव्यमिदं पण्डितानां सुग्राह्यं भवति । कादम्बर्याः संग्रहः पण्डितवर्येण अनन्ताचार्येण कृतः । काव्ये नायकः पुण्डरीकः नायिका महाश्वेता च भवति ।

20. अधः प्रदत्ताः सूचनाः आधारीकृत्य रसपद्धतीम् अधिकृत्य एकां टिप्पणीं लिखत ।

**सूचनाः** – भरतमुनिना आविष्कृतः – नाट्यशास्त्रम् – आनन्दवर्धनेन अभिनवगुप्तेन च पोषिता – नाट्ये काव्ये रसास्वाद एव सहृदयानां परमप्रयोजनम् – रससूत्रम् – अष्टरसाः ।

DITTO WS

**21-24 अधः प्रदत्तेषु त्रयाणां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं पञ्च अङ्काः ।** **(3 × 5 = 15)**

**21-24 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക. 5 സ്കോർ വീതം.**

21. यथोचितं योजयत ।

| क | ख |
|---|---|
| सन्तानगोपालम् । | उपनिषत्कथा । |
| किरातार्जुनीयम् । | जगन्नाथपण्डितराजः । |
| ज्ञानोदयः । | शूद्रकः । |
| मृच्छकटिकम् । | भारविः । |
| रसगङ्गाधरम् । | अश्वति तिरुनाल् महाराजः । |

22. प्रदत्तं गद्यभागं पठत । निर्देशानुसारम् उत्तराणि लिखत ।

अस्ति श्वेतकेतुर्नामकः दिव्यलोकवासी महामुनिः । सः कदाचित् पुण्डरीकोपविष्टां देवीं ददर्श । देव्याः मनः तं वीक्ष्य प्रणयातुरम् अभवत् । सद्य एव तस्याः मानसः कुमारः सञ्जातः ।

क. “दिव्ये लोके वसति इति” । एकपदं किम् ?

ख. श्वेतकेतुः पुण्डरीकोपविष्टां कां ददर्श ?

ग. कस्याः मनः प्रणयातुरम् अभवत् ?

घ. गद्यांशस्य उचितं शीर्षकं लिखत ।

23. सूचनानुसारं प्रदत्तस्य व्याख्यानं कुरुत ।

यत्र विनिर्भयमुदयति हृदयम्
यत्तोदात्तो मूर्धोदेति ।
यत्र प्रसरति परितो ज्ञानम्
परमं स्वातन्त्र्यं विदधानम् ।।

24. प्रदत्तं पद्यं पठित्वा प्रश्नानामुत्तराणि लिखत ।

समानशीलापि तदीयवल्लभा
तथैव नो चित्तजयं समेयुषि ।
कदाचिदूचे बत वृत्तिलब्धये
रमापतिः किं न सखा निषेव्यते ? ।।

क. कुचेलस्य वल्लभा कीदृशी आसीत् ?

ख. सा किं न समेयुषि ?

ग. रमापतिः कः ?

घ. कुचेलस्य सखा कः ?

ङ. तदीयवल्लभा कदाचित् किम् ऊचे ?

**25 – 28 प्रदत्तेषु त्रयाणाम् उत्तराणि लिखत । प्रत्येकम् अङ्कषङ्कम् ।** **(3 × 6 = 18)**

**25-28 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക. 6 സ്കോർ വീതം.**

25. प्रदत्तं गद्यभागं संगृह्य लिखत ।

भगवान् अपारकरुणासिन्धुः द्वारकानाथः भक्तानाम् आर्तिनाशनपटुः श्रीकृष्णः साम-दान-भेद दण्डाद्यैः चतुर्विधोपायैः भूमिपालने यथा माता स्वपुत्रं तथा सदाऽतीव श्रद्धालुः आसीत् । आर्तत्राणरक्षण चणः सः कृपायाः सागरमिव, धर्मस्य शैलमिव, सद्गुणानां केदारभूमिः इव सज्जनरक्षां दुर्जन शिक्षां च करोति स्म ।

एवं भगवति वासुदेवे धरायां शासति सति सर्वे वृष्यन्धक भोजप्रभृतयो यादवाः धर्मेण अर्थेन च सम्पूरितमनाः भूत्वा वसन्ति स्म ।

कदाचित् तत्र वसतः कस्यचित् ब्राह्मणस्य अष्ट पुत्राः जातमात्र एव विनष्टाः ।

अष्टसुतनष्टेन क्लिष्टः सः ब्राह्मणः सकलेषु यादवेषु दृश्यमाणेषु सत्सु, विभ्रष्टोत्त रीयः, विकचकचबन्धः, द्वारकां जवात् आगत्य गतायुषं पुत्रं राजद्वारे संस्थाप्य अतिदीनमत्युच्चं बहु रोदिति स्म ।

26. कथास्तम्भान् क्रमीकुरुत ।

- समीपे आगतं पुत्रं "दीघायुर्भव" इति वचोभिः अन्वग्रहीत्, "किमधीतवान्" इति अपृच्छत् च ।
- श्वेतकेतुः गुरुकुले उषित्वा सकलाः विद्याः जग्राह ।
- आत्मानं सर्वज्ञं मन्यमानस्य तस्य वदनं गर्वेण दीप्तमभवत् ।
- सः गुरुदक्षिणां दत्वा स्वभवनं प्रतिन्यवर्तत ।
- पुत्रम् अभिनन्दितुं पिता आबहिस्तोरणं जगाम ।
- लोकज्ञस्य शास्त्रनिपुणस्य पितुः मुखं पुत्रमुखदर्शनक्षण एव शोकछविना व्याप्तमभवत् ।

DITTO WS

27. चारुदत्तस्य मैत्रेयस्य च मिथः प्रवृत्तं सम्भाषणं सूचनानुसारम् उपन्यस्यत ।

**सूचनाः** – मृच्छकटिकम् – शूद्रकः – नायकः चारुदत्तः – दानेन दरिद्रो जातः – सखा मैत्रेयः – कदाचित् चारुदत्तस्य दारिद्र्यमधिकृत्य तं पृच्छति – चारुदत्तस्य प्रतिवचनम् – ग्रामदेवताभ्यो बलिः ।

28. प्रदत्तस्य पद्यस्य आस्वादनटीकां लिखत ।

जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतावभिमानसत्वौ ।
गुरुप्रदेयाधिकनिः स्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च ।।

**29 - 30 प्रदत्तयोरेकस्य उत्तरं लिखत । अष्ट अङ्काः ।** **(1 × 8 = 8)**

**29-30 വരെ ഒരു ചോദ്യത്തിന് ഉത്തരമെഴുതുക. 8 സ്കോർ.**

29. सूचनानुसारं सन्तानगोपालकथां संगृह्य लिखत ।

कुचेलस्य दारिद्र्यम् – भार्यायाः उपदेशः – कृष्णं द्रष्टुं गच्छति – कृष्णकृतः कुचेलसत्कारः पृथुक भोजनम् – रुग्मिण्याः वारणम् – कुचेलाय ऐश्वर्यप्रदानम् ।

30. नैषधीयचरितमधिकृत्य सूचनानुसारम् उपन्यासं लिखत ।

नैषधं विद्वदौषधम् – कविः श्रीहर्षः – कान्यकुब्जराजस्य विजयचन्द्रस्य सदस्यः – बृहत्रयी द्वा सर्गाः – नलस्य दमयन्त्याः च प्रणयकथा – शास्त्रतत्वानां समायोजनम् ।

---